संस्कृतवार्ताः

28.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· केन्द्र - सर्वकारेण चतुर्विंशत्यधिक - द्विसहस्त्रतमवर्षस्य पञ्चविंशत्यधिक -द्विसहस्त्रतमवर्षस्य च कृते महात्मा-गान्धी-राष्ट्रिय-ग्रामीण-रोजगार-गारंटी-अधिनियमान्तर्गतं संशोधित-पारिश्रमिक: अधिसूचित:।

· लोकसभानिर्वाचनस्य द्वितीयचरणस्य अधिसूचना निस्सारिता ।

· भारत-चीन-सीमाप्रकरणे परामर्शार्थं समन्वयार्थञ्च कार्यतन्त्रस्य इदं एकोनत्रिंशत्तमं उपवेशनं बीजिंगनगरे सुसम्पन्नम् ।

· यूक्रेनस्य विदेशमन्त्री दिमित्रो कुलेबा भारतस्य द्वि-दिवसीय-आधिकारिक-यात्रायै नवदिल्ल्यां समागत:।

· सर्वेभ्य: विश्वविद्यालयेभ्य: अयं निर्देशो दत्तः यत् ते प्रवेशपरीक्षायाः स्थाने विद्यावारिधी-कार्यक्रमेषु प्रवेशार्थं राष्ट्रियपात्रतापरीक्षायाः अङ्कानाम् उपयोगं कुर्यु: ।

· आईपीएल-प्रतिस्पर्धायां अद्य सायं जयपुरस्य सवाई-मानसिंह-क्रीडाङ्गणे राजस्थान-रॉयल्सदलम् दिल्लीकैपिटल्सदलम् सम्मुखीकरिष्यति।

<u>केन्द्र-मनरेगा</u>

केन्द्र-सर्वकारेण चतुर्विंशत्यधिक-द्विसहस्त्रतमवर्षस्य पञ्चविंशत्यधिक-द्विसहस्त्रतमवर्षस्य च कृते महात्मा-गान्धी-राष्ट्रिय-ग्रामीण रोजगार-गारंटी-अधिनियमान्तर्गतं संशोधित-पारिश्रमिक: अधिसूचित:। हरियाणायां अकुशल-श्रमिकेभ्य: दैनिक-पारिश्रमिक: चतुस्सप्तत्यधिक-त्रिशतं रुप्यकाणि, गोवायां षड्पञ्चाशदधिक-त्रिशतं रुप्यकाणि, कर्नाटके एकोनपञ्चाशदधिक-त्रिशतं , केरले षड्चत्वारिंशदधिक-त्रिशतं एवञ्च पंजाबराज्ये द्वाविंशत्यधिक-त्रिशतं रुप्यकाणि पारिश्रमिकत्त्वेन प्रदास्यते।

ग्रामीण-विकास-मन्त्रालयेन कथितं यत् इयं अधिसूचना अप्रैलमासस्य एकदिनाङ्कात् कार्यान्विता भविष्यति। मनरेगा-श्रमिकेभ्य: इत: पूर्वं पारिश्रमिके संशोधनं गतवर्षस्य मार्चमासे समभवत्।

<u>लोकसभानिर्वाचन</u>

लोकसभानिर्वाचनस्य द्वितीयचरणस्य अधिसूचना निस्सारिता अस्ति। अस्मिन् चरणे एकं केन्द्रशासित प्रदेशं एवं द्वादशराज्यानाम् अष्टाशीतिः आसनेषु निर्वाचनं भविष्यति।

एप्रिलमासस्य चतुर्थदिनांकपर्यन्तं नामाङ्कनं दातुं शक्यते। अस्य चरणस्य मतदानं एप्रिलमासस्य षड्विंशतिः दिनाङ्के भविष्यति। जम्मू-कश्मीरं विहाय सर्वेषु राज्येषु केन्द्रियक्षेत्रेषु च नामाङ्कनानां अन्वेषणम् अप्रैल-मासस्य पञ्च दिनाङ्के अथ जम्मू-कश्मीरे एप्रिल-मासस्य षट् दिनाङ्के च भविष्यति

<u>भारतचीन-उपवेशनम्</u>

भारत-चीनदेशाभ्यां भारत-चीनसीमा-क्षेत्रयो: पश्चिमीक्षेत्रे वास्तविक-नियन्त्रणरेखायां पूर्ण-विघटनप्राप्तये सहैव अवशिष्ट-प्रकरणानां निर्णयार्थं विचाराणां आदान-प्रदानं कृतम्। विदेश-मन्त्रालयेन अद्य कथितं यत् भारत-चीन-सीमाप्रकरणे परामर्शार्थं समन्वयनार्थञ्च कार्यतन्त्रस्य इदं एकोनत्रिंशत्तमं उपवेशनं ह्य: बीजिंगनगरे सुसम्पन्नम् । उपवेशनावधौ उभाभ्यामपि पक्षाभ्यां वास्तविक-नियन्त्रणरेखाया: विघटनप्रकरणे गहनचर्चा कृता सहैव राजनयिक एवं सैन्यवाहिनी-माध्यमेन नियमितसंपर्क-स्थापनार्थमपि सहमति: प्रकटिता।

<u>यूक्रेन-विदेशमन्त्री-यात्रा</u>

यूक्रेनस्य विदेशमन्त्री दिमित्रो कुलेबा इत्येष: विदेशमन्त्री-डॉ.जयशंकरस्य निमन्त्रणम् अधिकृत्य भारतस्य द्वि-दिवसीय-आधिकारिक-यात्रायै अद्य प्रात: नवदिल्ल्यां समागत:। स्वीय-यात्रावधौ श्री-कुलेबा इत्येष:
विदेशमन्त्रिणा सहैव उपराष्ट्रिय-सुरक्षा-परामर्शदात्रा सह आधिकारिक-उपवेशनेषु एवं विविध-कार्यक्रमेषु च भागं भजिष्यति। विदेश-मन्त्रालयेन एकस्मिन् आख्याने प्रोक्तं यत् उभौ मन्त्रिणौ परस्परहितान् आलक्ष्य सहैव क्षेत्रीय-एवं-वैश्विक-प्रकरणेषु द्विपक्षीय-सहभागितायै चर्चां करिष्यत:।

बीजेपी-महताब:

ओडिशाया: कटक-सांसद: भर्तृहरि-महताब: अद्य बीजेपी-दले सम्मिलित:। श्री महताबेन कतिपय-दिवसेभ्य: पूर्वं बीजेडी-दलात् त्यागपत्रं दत्तमासीत्। नवदिल्ल्यां भाजपा-मुख्यालये दलस्य वरिष्ठनेता एवं केन्द्रियमंत्री धर्मेन्द्र-प्रधान: सहैव दलस्य महासचिव: विनोद तावडे इत्यनयो: उपस्थितौ स: भाजपादले सम्मेलित:। अवसरेऽस्मिन् तत्र केचन अन्येऽपि प्रमुख-गणमान्या: भाजपादले सम्मेलिता:।

यूजीसी- विद्यावारिधि:-अधिसूचना

सर्वेभ्य: विश्वविद्यालयेभ्य: अयं निर्देशो दत्तः यत् ते प्रवेशपरीक्षायाः स्थाने विद्यावारिधी-कार्यक्रमेषु प्रवेशार्थं राष्ट्रियपात्रतापरीक्षायाः अङ्कानाम् उपयोगं कुर्यु:, विश्वविद्यालय-अनुदानायोगस्य अध्यक्षेण एम.-जगदीश-कुमारेण एकस्मिन् अन्तर्जालीय-सन्देशे प्रोक्तं यत् चतुर्विंशत्यधिकद्विसहस्रतमवर्षस्य जून-सत्रात् प्रवेशपरीक्षायाः स्थाने विद्यावारिधी-कार्यक्रमेषु प्रवेशार्थं राष्ट्रियपात्रतापरीक्षायाः अङ्कानाम् उपयोगं कर्तुं शक्यते।

ए.एफ.एस.पी.ए

केन्द्रप्रशासनेन नागालैण्डराज्यस्य अष्ट-जनपदेषु अरुणाचलप्रदेशस्य त्रिषु जनपदेषु आगामिमासस्य प्रथमदिनात् आरभ्य सशस्त्रसेनाधिनियमस्य विस्तारः कृतः। नागालैण्ड्-राज्यस्य अन्येषु पञ्चमण्डलेषु एकविंशतिः आरक्षि-स्थानकेषु, अरुणाचल-प्रदेशस्य एकस्य जनपदस्य त्रीषु आरक्षि-स्थानकेषु अपि अस्य विस्तारः कृतः। नागालैण्ड्-अरुणाचल-प्रदेशयोः कतिपयेषु जनपदेषु, आरक्षी-स्थानकेषु च ए.एफ.एस.पी.ए-सङ्घटनं बहुवर्षेभ्यः प्रचलति, तस्य विस्तारः अपि समयेन भवति।

सैन्य- सेनाध्यक्ष -सम्मेलनम्

अद्य नवदिल्ल्यां चतुर्विंशत्यधिक-द्विसहस्र-तमस्य वर्षस्य सैन्य-सेनाध्यक्ष-सम्मेलनम् आभासीय-माध्यमेन प्रत्यक्ष-माध्यमेन च आरब्धम्। सम्मेलनमिदं भारतीयसेनायाः शिखरनेतृत्वस्य कृते अवधारणात्मकविषयेषु विचारविमर्शं कर्तुं, समग्रसुरक्षास्थितेः समीक्षाम् आंकलनम् च कर्तुं महत्त्वपूर्णमञ्चरूपेण कार्यं करोति। अस्य सम्मेलनस्य उद्देश्यम् भारतीयसेनाया:

समग्रविकास: वर्तते। थलसेनाअध्यक्षः जनरल् मनोज पाण्डे इत्येष: स्वीय-मुख्यालयात् आभासीय-माध्यमेन अन्य-प्रतिभागिभि: सह वार्तां करिष्यति।

## राष्ट्रपति-आधारभूत संख्या

राष्ट्रपति-पदासीना द्रौपदी मुर्मु: सबलं प्रतिपादितवती यत् आधारभूत-संरचना: एवं निर्माण-परियोजना: जलवायु-अनुकूलत्वेन सहैव ऊर्जा कुशलत्वेन च निर्मिता: भवेयु:। अद्य राष्ट्रपति-भवने सीपी-डब्ल्यू-डी इत्यस्य सहायक-कर्मचारी-अभियन्तॄणां समूहं सम्बोधयन्ती सा प्रोक्तवती यत् भवनानि, मार्गा:, अन्ये च मूलाधारा: ऊर्जाकुशला: सहैव पर्यावरणानुकूला: भवेयु:। तया प्रोक्तं यत् अभियन्तार: स्वीय-दृष्टिकोणे नवान्वेषिण: स्यु:। अनेन भावी-समाह्वानानि सम्मुखीकर्तुं वयं सिद्धा: भविष्याम:। राष्ट्रपतिना युवा-अभियन्तार: परामृष्टा: यत्ते सहयोगात्मकतां सहैव प्रौद्योगिकी-संचालित-दृष्टिकोणं स्वीकुर्यु:।

## राष्ट्रिय-परीक्षाभिकरण-जेईई-मेन्स

राष्ट्रिय-परीक्षाभिकरणेन अस्य वर्षस्य जेईई-मेन्स-परीक्षाया: द्वितीयसत्रे परीक्षार्थिभ्य: तेषां परीक्षा-नगरस्य आवंटनार्थं अग्रिम-सूचना निस्सारिता। जेईई-मेन्स-परीक्षाया: द्वितीयसत्रम् अप्रैलमासस्य चतुर्थदिनाङ्कात् द्वादशदिनांङ्कं यावत् एकोनविंशत्यधिक-त्रिशत-नगराणां विभिन्नकेन्द्रेषु भविष्यति । एतेषु द्वाविंशति: नगराणि विदेशेषु सन्ति।

इयं परीक्षा प्रत्येकदिनं द्वयो: चक्रयो: प्रचालयिष्यते। प्रथमचक्रस्य परीक्षा प्रात:-नववादनात् मध्याह्न-द्वादशवादनं यावत् सहैव द्वितीयचक्रस्य त्रिवादनात् आरभ्य सायं षड्वादपर्यन्तं प्रचलिष्यति। अप्रैलमासस्य द्वादशदिनाङ्के परीक्षा केवलं प्रात:कालीन- चक्रे एवं भविष्यति। परीक्षार्थिन: एनटीए इत्यस्य वेबफलके स्वीय-आवेदनसंख्यां सहैव जन्मतिथिं प्रपूर्य परीक्षाकेन्द्रेण सम्बन्धितं नगरम् ज्ञातुं शक्ष्यन्ति।

## भारतीय-ऋतु-विज्ञान-विभागः

भारतीय-ऋतु-विज्ञान-विभागेन न्यूनत: - सामान्य वृष्टेः पूर्वानुमानं कृतम् अस्ति। पश्चिमहिमालयक्षेत्रेषु, देशस्य उत्तर-पश्चिमीभागेषु, तत्समीपस्थेषु समतलक्षेत्रेषु च अग्रिमचतुर्दिनानि यावत् वर्षा भविष्यति । तत्र उक्तं यत् अन्यः नूतन-पाश्चात्य-विक्षोभः पश्चिमहिमालयक्षेत्रं प्रभावयिष्यति इति सम्भावना वर्तते, येन रविवासरपर्यन्तं जम्मू-कश्मीर-

लद्दाख-गिल्गित-बल्तिस्तान- मुजफ्फरबाद-हिमाचलप्रदेश-पञ्जाब-हरियाणा-चण्डीगढ-उत्तरप्रदेश-उत्तराखण्ड-चेत्यादिषु स्थानेषु वज्रपातेन विद्युत्प्रवाहेन च सह व्यापकरूपेण लघुवृष्टिः भवितुं शक्यते।

आईपीएल-प्रतिस्पर्धा

आईपीएल-प्रतिस्पर्धायां अद्य सायं जयपुरस्य सवाई-मानसिंह-क्रीडाङ्गणे राजस्थान-रॉयल्सदलम् दिल्लीकैपिटल्सदलम् सम्मुखीकरिष्यति। स्पर्धा अद्य सायं सार्धसप्तवादनात् समारप्स्यते। ह्य: रात्रौ हैदराबादस्य राजीव-गान्धी-अन्ताराष्ट्रिय-क्रीडाङ्गणे सनराइजर्स-हैदराबाददलेन मुंबई-इंडियंसदलम् एकत्रिंशत्-धावनाङ्कै: पराजितम्।

।। इति वार्ता: ।।